उपसम्भाषा उपसान्त्वनम्–कर्मकरानुपवदते । उपसान्त्वयति इत्यर्थः । ज्ञानं सम्यगवबोधः––वदते चार्वी लोकायते । [1]जानाति वदितुम् इत्यर्थः । यत्न उत्साहः––क्षेत्रे वदते । [2]गेहे वदते । तद्विषयमुत्साहमाविष्करोति इत्यर्थः । विमतिर्नानामतिः–क्षेत्रे विवदन्ते । गेहे विवदन्ते । [3]विमतिपतिता विचित्रं भाषन्ते इत्यर्थः । उपमन्त्रणं रहस्युपच्छन्दनम्–[4]कुलभार्यामुपवदते । परदारान् उपवदते । [5]उपच्छन्दयति इत्यर्थः । [6]एतेषु इति किम् ? यत् किञ्चिद् वदति ॥

## व्यक्तवाचां समुच्चारणे । (४८/२७२१)

वदः इति वर्तते । [7]व्यक्तवाचां समुच्चारणं सहोच्चारणम् । तत्र वर्तमानाद् वदतेरात्मनेपदं भवति । ननु[8] 'वद व्यक्तायां वाचि' (धा. पा. १००९) इत्येव पठ्यते, तत्र किं व्यक्तवाचाम् इति[9] विशेषणेन ? प्रसिद्ध्युपसंग्रहार्थ[10]मेतत् । व्यक्तवाचः इति [11]हि मनुष्याः प्रसिद्धाः । तेषां समुच्चारणे यथा स्यात् । संप्रवदन्ते ब्राह्मणाः । संप्रवदन्ते क्षत्रियाः । व्यक्तवाचाम् इति किम् ? [12]संप्रवदन्ति कुक्कुटाः (म. भा. १.२८३) । समुच्चारणे इति किम् ? [13]ब्राह्मणो वदति । क्षत्रियो वदति ॥

## अनोरकर्मकात् । (४९/२७२२)

वदः इति, व्यक्तवाचाम् इति [14]च वर्तते । अनुपूर्वाद् वदतेरकर्मकाद् [15]व्यक्तवाग्विषयादात्मनेपदं भवति । अनुवदते कठः [16]कलापस्य । अनुवदते [17]मौद्गः पैप्पलादस्य । अनुः सादृश्ये । यथा [18]कलापोऽधीयानो वदति तथा कठः इत्यर्थः । अकर्मकात् इति किम् ? पूर्वमेव यजुरुदितमनुवदति । [19]व्यक्तवाचाम् इत्येव । अनुवदति वीणा ॥

## विभाषा विप्रलापे । (५०/२७२३)

वदः इति वर्तते, व्यक्तवाचां समुच्चारणे इति च । [20]विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्तमानाद् वदतेरात्मनेपदं भवति विभाषा । प्राप्तविभाषेयम् । विप्रवदन्ते [21]सांवत्सराः, विप्रवदन्ति सांवत्सराः । विप्रवदन्ते [22]मौहूर्ताः, विप्रवदन्ति मौहूर्ताः । युगपत् [23]परस्पर[24]प्रतिषेधेन विरुद्धं [25]वदन्ति इत्यर्थः । विप्रलापे इति किम्? [26]संप्रवदन्ते ब्राह्मणाः । व्यक्तवाचाम् इत्येव । विप्रवदन्ति शकुनयः । समुच्चारणे [27]इत्येव । क्रमेण मौहूर्ता [28]मौहूर्तेन सह [29]विप्रवदन्ति ॥

---

1. ज्ञानं वदति इत्यर्थः अ, प्रमितुं इत्यर्थः ह. 2. उदाहरणमिदं नास्ति अ. 3. विमतिप्रतिपन्ना ड. 4. गुरुभार्यामुपवदते अ. 5. रहसि इत्यधिकम् क. ह. 6. तेषु ड. 7. व्यक्ता वाचो येषां ते व्यक्तवाच-स्तेषां इत्यधिकम् फ. 8. च इत्यधिकम् फ. ह. 9. अनेन इत्यधिकम् ड. 10. इदम् फ. 11. हि नास्ति फ. 12. वरतनु इत्यधिकम् ब. ड. ह,

'अयि विजहीहि दृढोपगूहनं त्यज नवसंगमभीरु वल्लभम् ।
अरुणकरोद्गम एष वर्तते वरतनु संप्रवदन्ति कुक्कुटाः ॥' क.
'अपनय पादसरोजमंकतः शिथिलय बाहुलतां गलादृताम् ।
क्व च वदनेंऽशुकमाकुलीकृतं वरतनु संप्रवदन्ति कुक्कुटाः ॥' पदमं.

13. उदाहरणमिदं नास्ति अ. 14. च नास्ति ह. 15. व्यक्तवाग्विशेषविषयात् क. 16. कालापस्य क. 17. मोदेः ब, मोदः क. ड. फ. 18. अधीयमानो फ. 19. व्यक्तवाचम् ब. 20. विरुद्धः प्रलापो विप्रलापः इत्यधिकम् अ. क. ह. 21. सांवत्सरिकाः ह. 22. मौहूर्तिकाः क. फ. ह. 23. परस्परं अ. ड. 24. विप्रतिषेधेन क. 25. भाषन्ते फ. 26. उदाहरणमिदं नास्ति अ. 27. इति किम् फ. 28. मौहूर्तिकेन क, मौहूर्तिकैः फ. 29. प्रवदन्ते फ.